শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ সপ্তনৱতিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ সপ্তনৱতিতমঃ সর্গঃ ॥

## শ্রীরামেণ কুপিতং সৌমিত্রিং পরিসান্ত্ব্য ভরতসদ্ভাৱস্য ৱর্ণনম্, লজ্জিতস্য লক্ষ্মণস্য শ্রীরামপার্শ্ৱে গমনম্, তস্য শৈলস্য সমন্তাদ্ ভরতসৈন্যস্য নিৱেশনম্

সুসংরব্ধং তু ভরতং লক্ষ্মণং ক্রোধমূর্চ্ছিতম্।
রামস্তু পরিসান্ত্ব্যাথ ৱচনং চেদমব্রৱীৎ॥ **2.97.1** ॥

কিমত্র ধনুষা কার্যমসিনা ৱা সচর্মণা।
মহাবলে মহোৎসাহে ভরতে স্ৱযমাগতে॥ **2.97.2** ॥

পিতুঃ সত্যং প্রতিশ্রুত্য হৎৱা ভরতমাহৱে।
কিং করিষ্যামি রাজ্যেন সাপৱাদেন লক্ষ্মণ॥ **2.97.3** ॥

যদ্ দ্রৱ্যং বান্ধৱানাং ৱা মিত্রাণাং ৱা ক্ষযে ভৱেৎ।
নাহং তৎ প্রতিগৃহ্ণীযাং ভক্ষ্যান্ ৱিষকৃতানিৱ॥ **2.97.4** ॥

ধর্মমর্থং চ কামং চ পৃথিৱীং চাপি লক্ষ্মণ।
ইচ্ছামি ভৱতামর্থে এতৎ প্রতিশৃণোমি তে॥ **2.97.5** ॥

ভ্রাতৃণাং সঙ্গ্রহার্থং চ সুখার্থং চাপি লক্ষ্মণ।
রাজ্যমপ্যহমিচ্ছামি সত্যেনাযুধমালভে॥ **2.97.6** ॥

নেযং মম মহী সৌম্য দুর্লভা সাগরাম্বরা।
নহীচ্ছেযমধর্মেণ শক্রৎৱমপি লক্ষ্মণ॥ **2.97.7** ॥

যদ্ ৱিনা ভরতং ৎৱাং চ শত্রুঘ্নং ৱাপি মানদ।
ভৱেন্মম সুখং কিঞ্চিদ্ ভস্ম তৎ কুরুতাং শিখী॥ **2.97.8**॥

মন্যেঽহমাগতোঽযোধ্যাং ভরতো ভ্রাতৃৱৎসলঃ।
মম প্রাণৈঃ প্রিযতরঃ কুলধর্মমনুস্মরন্॥ **2.97.9**॥

শ্রুৎৱা প্রব্রাজিতং মাং হি জটাৱল্কলধারিণম্।
জানক্যা সহিতং ৱীর ৎৱযা চ পুরুষোত্তম॥ **2.97.10**॥

স্নেহেনাক্রান্তহৃদযঃ শোকেনাকুলিতেন্দ্রিযঃ।
দ্রষ্টুমভ্যাগতো হ্যেষ ভরতো নান্যথাঽঽগতঃ॥ **2.97.11**॥

অম্বাং চ কেকযীং রুষ্য ভরতশ্চাপ্রিযং ৱদন্।
প্রসাদ্য পিতরং শ্রীমান্ রাজ্যং মে দাতুমাগতঃ॥ **2.97.12**॥

প্রাপ্তকালং যথৈষোঽস্মান্ ভরতো দ্রষ্টুমর্হতি।
অস্মাসু মনসাপ্যেষ নাহিতং কিঞ্চিদাচরেৎ॥ **2.97.13**॥

ৱিপ্রিযং কৃতপূর্ৱং তে ভরতেন কদা নু কিম্।
ঈদৃশং ৱা ভযং তেঽদ্য ভরতং যদ্ ৱিশঙ্কসে॥ **2.97.14**॥

নহি তে নিষ্ঠুরং ৱাচ্যো ভরতো নাপ্রিযং ৱচঃ।
অহং হ্যপ্রিযমুক্তঃ স্যাং ভরতস্যাপ্রিযে কৃতে॥ **2.97.15**॥

কথং নু পুত্রাঃ পিতরং হন্যুঃ কস্যাঞ্চিদাপদি।
ভ্রাতা ৱা ভ্রাতরং হন্যাৎ সৌমিত্রে প্রাণমাত্মনঃ॥ **2.97.16**॥

যদি রাজ্যস্য হেতোস্ত্ৱমিমাং ৱাচং প্রভাষসে।
ৱক্ষ্যামি ভরতং দৃষ্টৱা রাজ্যমস্মৈ প্রদীযতাম্॥ **2.97.17**॥

উচ্যমানো হি ভরতো মযা লক্ষ্মণ তদ্ৱচঃ।
রাজ্যমস্মৈ প্রযচ্ছেতি বাঢমিত্যেৱ মংস্যতে॥ **2.97.18**॥

তথোক্তো ধর্মশীলেন ভ্রাত্রা তস্য হিতে রতঃ।
লক্ষ্মণঃ প্রৱিৱেশেৱ স্বানি গাত্রাণি লজ্জযা॥ **2.97.19** ॥

তদ্বাক্যং লক্ষ্মণঃ শ্রুৎৱা ব্রীডিতঃ প্রত্যুৱাচ হ।
ৎৱাং মন্যে দ্রষ্টুমাযাতঃ পিতা দশরথঃ স্বযম্॥ **2.97.20** ॥

ব্রীডিতং লক্ষ্মণং দৃষ্টৱা রাঘৱঃ প্রত্যুৱাচ হ।
এষ মন্যে মহাবাহুরিহাস্মান্ দ্রষ্টুমাগতঃ॥ **2.97.21** ॥

অথৱা নৌ ধ্রুৱং মন্যে মন্যমানঃ সুখোচিতৌ।
ৱনৱাসমনুধ্যায গৃহায প্রতিনেষ্যতি॥ **2.97.22** ॥

ইমাং চাপ্যেষ ৱৈদেহীমত্যন্তসুখসেৱিনীম্।
পিতা মে রাঘৱঃ শ্রীমান্ ৱনাদাদায যাস্যতি॥ **2.97.23** ॥

এতৌ তৌ সম্প্রকাশেতে গোত্রৱন্তৌ মনোরমৌ।
ৱাযুৱেগসমৌ ৱীরৌ জৱনৌ তুরগোত্তমৌ॥ **2.97.24** ॥

স এষ সুমহাকাযঃ কম্পতে ৱাহিনীমুখে।
নাগঃ শত্রুঞ্জযো নাম ৱৃদ্ধস্তাতস্য ধীমতঃ॥ **2.97.25** ॥

ন তু পশ্যামি তচ্ছত্রং পাণ্ডুরং লোকৱিশ্রুতম্।
পিতুর্দিৱ্যং মহাভাগ সংশযো ভৱতীহ মে॥ **2.97.26** ॥

ৱৃক্ষাগ্রাদৱরোহ ৎৱং কুরু লক্ষ্মণ মদ্বচঃ।
ইতীৱ রামো ধর্মাত্মা সৌমিত্রিং তমুৱাচ হ॥ **2.97.27** ॥

অৱতীর্য তু সালাগ্রাৎ তস্মাৎ স সমিতিঞ্জযঃ।
লক্ষ্মণঃ প্রাঞ্জলির্ভূৎৱা তস্থৌ রামস্য পার্শ্ৱতঃ॥ **2.97.28** ॥

ভরতেনাথ সন্দিষ্টা সম্মর্দো ন ভৱেদিতি।
সমন্তাৎ তস্য শৈলস্য সেনা ৱাসমকল্পযৎ॥ **2.97.29** ॥

অধ্যর্ধমিক্ষ্ৱাকুচমূর্যোজনং পর্ৱতস্য হ।
পার্শ্ৱে ন্যৱিশদাৱৃত্য গজৱাজিনরাকুলা ॥ **2.97.30** ॥

সা চিত্রকূটে ভরতেন সেনা
ধর্মং পুরস্কৃত্য ৱিধূয দর্পম্।
প্রসাদনার্থং রঘুনন্দনস্য
ৱিরোচতে নীতিমতা প্রণীতা ॥ **2.97.31** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে সপ্তনৱতিতমঃ সর্গঃ ॥